Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# शिक्षाशास्त्रसम्बद्ध-अधिगमपारिभाषिकशब्दानां विमर्शः

**डा. मदनकुमारझाः**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः
के.सं.वि.वि.श्रीरणवीरपरिसरः, जम्मूः

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भूवा**
**आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः ।।**

भाषा हि मर्त्यानाम् आशयविनिमयोपाधिभूता मानवमस्तिष्के स्थितान् भावान् वर्णात्मकध्वन्यात्मक-अभिव्यञ्जात्मकादिभावाभिव्यक्तिसाधनमेव विनिवेदयति । लोके तु भाषायाः सीमा अनिश्चितः वरीवर्ति । यदा किञ्चित् विशिष्टं विज्ञापयितुमिच्छति तदा विनूतनमार्गम् अन्वेष्यति मानवाः । यच्च सामान्यभाषया उद्बोधयितुम् अशक्यं तद्बोधनाय विनूतनाम् एव प्रणालीं समाप्नुवन्ति । तादृशस्य यत्नस्य प्रतिफलमेव शास्त्रीयपरिभाषासु सन्दृश्यते । शास्त्रं हि असन्दिग्धकार्याकार्यनियामकम् । तत्र सामान्यभाषाप्रयोगानाम् असन्देहाभावत्वात् सामान्यभाषाप्रयोगाः सुतराम् अनर्हाः भवन्ति । तस्मात् शास्त्रकाराः तत्तत्शास्त्रेषु शास्त्रसामान्येषु च केषांचित् शब्दानां नियतार्थकत्वं परिकल्प्य तैः पदैः शास्त्रेषु असन्दिग्धार्थप्रतिपत्तीं प्रदर्शयामासुः । यथा- व्याकरणशास्त्रे वृद्धिः नदी इत्यादयः संज्ञा । न्यायशास्त्रे अवच्छिन्नावच्छेदहेतूपाधयः । एवमेव आधुनिके काले अपि वैज्ञानिकाः विशिष्य पाश्चात्याः स्व-स्वशास्त्रप्रतिपादने कानिचित् विनूतनां भाषां व्यरचयन् । तद्धि आङ्ग्लभाषायां Scientific Technical Terminology इति पदेन व्यवह्रियते । एतादृशपारिभाषिकपदानि यद्यपि विषयं स्पष्टीकुर्वन्ति तथापि भाषान्तरेषु गतेषुसत्सु विषयावगमने महत क्लेशमुत्पादयन्ति ।

विशिष्य आधुनिकवैज्ञानिकक्षेत्रस्थानि पदानि यानि यूरोपीयभाषाभूयिष्ठानि तानि भारतीयभाषा भाषिषु बहुक्लेशं जनयन्ति । यद्यपि सर्वेषां पदानां तत्समपदावली भाषान्तरेषु च अवलोक्यते । तथापि भूयसां पदानां तत्समपदावली भाषान्तरेषु विद्यत एव । तादृशपदावली निर्माणाय भारतीय सर्वकारेण 1950 तमे वर्षे –इति काचित् संस्था निरमायि । तैः पारिभाषिकपदानां भाषान्तरीयकरणाय केचन सिद्धान्ताः काश्चन पद्धतयश्च प्राचर्चिषत । तेषु प्रमुखम् इदमस्ति यत् यदि किञ्चित् परिभाषा पदं त्रिसृषु वा अधिकासु यूरोपीय भाषासु समानं भवति तर्हि तस्यानुवादः नापेक्षितः । यानि पदानि भाषान्तरस्वीकृतानि परिचितानि तान्यपि भाषान्तरीकरणं नार्हति । तेषां मते भाषान्तरीकरणस्य मुख्यं लक्ष्यं पारिभाषिकपदार्थस्य सम्यगवगतिः स्यात् इति ।

किञ्च संस्कृतभाषायां काचित् दिव्या कोशपरम्परा वर्तते तद्यथा- कश्यपेन कृतारम्भः यास्केन क्षुण्णः, सुरसिंहेन परिष्कृतश्चायं सर्वत्र अवलोक्यते । परिनिष्ठितरीत्या कोशस्वरूपं , निघण्टुरिति व्यवहारश्च यावदुपलब्धि सर्वप्रथमं कश्यपकृतौ प्रवर्तते । क्लिष्टार्थानि सन्दिग्धार्थानि च पदानि विवरीतुकामः कश्यप,

**गौ ग्मा ज्मा च क्ष्मा क्षा क्ष्मा क्षोणी पृथ्वी क्षितिर्मही ।**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**निर्ऋतिर्भूरिला चोर्वी रिपः पूषा तथा॥दितिः**[1]

इत्यारभ्य पृथिव्यादीनां नामानि सङ्गृह्य समाम्नायापरपर्यायं निघण्टुं लोकायान्वगृह्णात् । समाम्नाये त्रयः काण्डास्ससन्ति नैघण्टुकः नैगमः दैवतश्चेति ।

**वैदिककोशाः** – निघण्टोरेव व्याख्या निरुक्तनाम्ना यास्केनाकारि , यस्य समयः क्रीस्तोः प्राक् सप्तमशतकात् पूर्वमिति ऐतिहासिकविमर्शकाग्रेसरा अभिप्रयन्ति [2] पदानानं सङ्ग्रहणे तदर्थविवरणे व्युत्पत्तिनिरूपणे च यास्केनानुसृता शैली तं कोशकर्तृष्वग्रिमे स्थाने सङ्ख्यापयति । दिङ्मात्रं यथा – आचार्य आचारं ग्राहयति-आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा.[3] , शाखाः खशयाः[4] गायत्रं गायतेः स्तुतिकर्मणः,[5]पुरुषं पुरिशय इत्याचक्षीरन्[6]। अत एव निघण्टुनाम्ना न , किन्तु निरुक्तनाम्ना शास्त्रमिदं वेदाङ्गतामाप । निरुक्तस्य बह्व्यः व्याख्याः विलसन्ति । तत्र क्री.श 1050-1350 वत्सरयोर्मध्यकाले कदाचित् निघण्टुनिर्वचनमिति नाम्ना स्कन्दस्वामिना विहिता व्याख्या प्राचीनेति तर्क्यते । दुर्गाचार्येण क्री.श.1387 वत्सरात् पूर्वं प्रणीता वृत्तिः नितान्तं प्रथते ।

**शास्त्रकोशाः** –

शास्त्रीयसंज्ञानां ,पारिभाषिकपदानां विषये साधारणकोशकर्तृभिः दत्तानि विवरणानि, तत्तच्छास्त्रज्ञदत्तनिर्वचनेभ्यो भिद्यन्ते । क्रियाशब्दस्य कृतिरिति सामान्योऽर्थः । अमरकोशे –

**आरम्भो निष्कृतिशिक्षा पूजनं सम्प्रधारणम् ।**
**उपायः कर्म चेष्टा च चिकित्सा च नव क्रिया ॥**[7]

इति स्त्रीलिङ्गस्य क्रियाशब्दस्य विविधाः अर्थाः न्यबध्यन्त । तत्रैव सुधाव्याख्यायामुद्धृते –

**क्रिया कर्मणि चेष्टायां करणे सम्प्रधारणे ।**
**आरम्भोपायशिक्षार्थचिकित्सानिष्कृतावपि ॥**[8]

इति विश्वकोशवाक्ये कोशान्तरगताः क्रियाशब्दार्थाः व्यव्रियन्त । एवमेवव्याकरणकोशाः, वर्णविवरणकोशाः, वैद्यककोशाः, नाट्यकोशः, राजव्यवहारकोशाः, साधारणकोशाः – लौकिकवाङ्गमयकोशानां मध्ये नामलिङ्गानुसासननाभिख्यः अमरसिंहप्रणीतः अमरकोशस्सुप्रथते । अमरसिंहात्प्राक्तनेषु इतोऽपि बहवः व्याडिवररूचिकात्याययनादयः कोशकर्तार आसन् ।[9] एवमेव नैकभाषाकोशाः,

---

[1] Niruktam, Meherchand Lachhman Das Publications, New Delhi 1982 p. 47

[2] Systems of Sanskrit Grammar, S.K. Belvalkar, Bharatiya Vidya Prakasan, Delhi, 1998, p.6

[3] Niruktam, Meherchand Lachhman Das Publications, New Delhi 1982 p.6

[4] ibid p.16

[5] ibid p.25

[6] ibid p.33

[7] अमरकोशः, सुधाव्याख्यासहितः, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2003, श्लोकसं.3-156

[8] अमरकोशः, सुधाव्याख्यासहितः, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2003, श्लोकसं.3-156 (व्याख्याकारस्य उद्धरणम्, पुटसङ्ख्या 3)

[9] "शब्दार्णव उत्पलिनी संसारावर्त इत्यपि । कोशा वाचस्पति व्याडिविक्रमादित्यनिर्मिताः" ॥ Quoted in History of Sanskrit Lexicograhpy , MM Pathkar, Munshiram Manoharlal Pub, New Delhi 1981 p. 69

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

कोशाः-भाषाशास्त्रं च बृहत्कोशाः(Encyclopedic Dictionaries) यथा-भारतीयदर्शनबृत्कोशः ,कर्ता ब्रच्चूलाल अवस्थिमहोदयाः । प्रायशः सर्वेष्वपि शास्त्रेषु स्वपारिभाषिकपदार्थनिरूपणाय स्वतन्त्रा वा ग्रन्थः ग्रन्थावयवभूतं वा किञ्चित्प्रकरणं वर्तत एव । अयं स्वभावः आधुनिकयुगे आविर्भूतेष्वपि शास्त्रेषु दरीदृश्यते ।

अनयैव रीत्या शिक्षाशास्त्रे अपि पारिभाषिकपदार्थविवरणावश्यकता आधुनिकैः प्रशिक्षकैरन्वभावि । परिणामरूपेण प्रशिक्षणक्षेत्रे बहवः कोशाः बृहत्कोशाश्चाविरभूवन् । तेषु बहव आङ्ग्लभाषायां , विरलाश्च तदितरभाषासु न्यबध्यन्त । अस्मिन् क्षेत्रे निघण्ट्वपेक्षया बृहत्कोशा एवाधिकं वर्तन्त इति भाति । यथा- Encyclopedic Dictionary & Directory of Education इत्यस्मिन् ग्रन्थे [10]प्रथमे भागे पारिभाषिकपदार्थविवरणेन साकं पर्यायपदानि प्रादायिषत । एवमेव Encyclopedia of Educational Technology , International Encyclopedia of Higher Education , Encyclopedia of Indian Education[11]इत्यादयो ग्रन्थाः शिक्षाशास्त्रनिष्णातानामादरपात्रतामगुः । शिक्षाक्षेत्रीयकोशरङ्गे दृष्टिः प्रसार्यते चेत् , Descriptive Dictionary of Educational Technology (English –English –Kannada )[12] इत्यादयो विरला एव ग्रन्थाः दृश्यन्ते । अद्यत्वे संस्कृतशिक्षाक्षेत्रे छात्राध्यापकानां प्रशिक्षकाणं च सङ्ख्या दिनाद्दिनमेधते । मनस्तत्त्वशास्त्रस्य शिक्षणप्रविध्यादीनां च सम्मेलनेन शिक्षाशास्त्रमबृंहत् । अतः शिक्षाक्षेत्रे वसतां संस्कृतज्ञानां लाभाय कश्चित्तादृशः कोश आवश्यको जातो यस्संस्कृतपृष्ठभूमिमाधारीकृत्य निरमीयत् ।

तामेतामावश्यकतामुपलक्ष्य संस्कृतव्याकरणे , इतरेषु वेदाङ्गेषु , साहित्ये , विशिष्य शिक्षाशास्त्रे , तदन्तर्भूतेषु मनोविज्ञानादिषु च निष्णाताः , स्वयं छात्राध्यापकप्रशिक्षकाः आचार्य आर् देवनाथन् महाभागाः अधिगमकोशः Descriptive Dictionary of Learning Terminology इति ग्रन्थरत्नं निरमासिषुः । संस्कृतभाषाभिज्ञानां, शिक्षाशास्त्रजिज्ञासूनां सर्वेषामपि महोपकारकेऽस्मिन् Ability इत्यारभ्य Zero Transfer इति पर्यन्तं 550 सङ्ख्यानां वर्णक्रमानुसारिणां पदानामर्थस्सविवरणमुपान्यासि । दिङ्मात्रं यथा –

**Methodology –**

- **Conventionally the term refers to acquisition of teaching skill in a particular school subject such as Sanskrit methodology , English methodology , Science methodology etc. Now this methodology course is known as 'methods courses or curriculum courses'.[13]** इति सामान्यकोशेभ्योऽस्य कोशस्य वैलक्षण्यमधस्तनमुदाहरणमेव प्रत्याययति । तथा हि – आङ्ग्लभाषायां course इति पदस्यार्थमन्वेष्टुं सामान्यनिघण्टुं पश्यामश्चेत् Going on in space or time , race or carries line or conduct or action; series ; ground on which race is run; distinct part of a meal; continuous layer of stone in a building. [14]इत्यभ्यधायि । परमयमेव शब्दः देवनाथीये, A series of lessons under a common title. A series of titles or subjects consisting of series of certification. [15]इति व्यावर्णि ।

**उपसंहारः** – तदित्थं सामान्येभ्यः शिक्षाशास्त्रीयस्यास्य कोशस्य वैलक्षण्यं सुस्पष्टम् । तावदेव न शिक्षाशास्त्रगतान्यपि कोशान्तराणि देवनाथीयोऽतिशेते । अतः भारतीयज्ञानपरम्परा विश्वस्मिन् विश्वे प्रथिता वर्तते ।

---

[10] A.Biswas, J.C.Aggarwal, Vol.I, The Academic publishers (India) New Delhi ,2004
[11] (2Vols.) Ed.J.S. Rajput, N.C.E.R.T, New Delhi, 2004
[12] A.S. Raghavakumari , Abhijit Prakashana, Mysore, 1996
[13] Descriptive Dictionary of Learning Terminology, Term No.293
[14] Little oxford dictionary p. 122
[15] Descriptive Dictionary of Learning Terminology, Term No.115

International Journal of Multidisciplinary Educational Research
ISSN:2277-7881(Print); Impact Factor :9.014(2025); IC Value:5.16; ISI Value:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

Cover Page

# परिशिष्टम् (APPENDIX)

| S.N. English Terms | Sanskrit Technical Terminology |
|---|---|
| **1,** Ability | योग्यता |
| **2.**Grouping | योग्यतावर्गीकरणम |
| **3.** Academic Persistence | शैक्षिकस्थिरता |
| **4.**Academic Standard | शैक्षिकस्तरः |
| **5.**Accelerated Learning | उत्तेजिताधिगमः |
| **6.**Accidental Error | आकस्मिकत्रुटिः |
| **8.** Accountability | परानुयोगायत्तता |
| **9.** Accuracy | विशुद्धता |
| **10.** Achievement | उपलब्धिः |
| **11.** Action Learning | क्रियाधिगमः |
| **12.** Action Maze | क्रियाधिगमदुर्गमः |
| **13.** Action Verb, | विधिः, विधिक्रिया, विधायकक्रिया वा, |
| 14. Active Learning | सक्रियाधिगमः |
| **15.** Active Learning Methods | सक्रियाधिगमविधयः |
| **16.** Active Listening | सक्रियश्रवणम् |
| **17.** Activity Step | गतिसोपानम्, क्रियासोपानम् |
| 18. Backwardness | पृष्ठगामिता |
| 19. Bandwidth, | नयायतता, शकलायतता |
| 20. Baseline | आधाररेखाविवरणम् |
| 21. Behavior | व्यवहारः |
| 22. Behavioral Objectives | व्यावहारिकोद्देश्यानि |
| 23. Case Study | व्यक्तिवृत्ताध्ययनम् |

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

| | |
|---|---|
| 24. Circuit Teacher | आवर्तशिक्षकः |
| 25. C-Learning | पारम्परिकाध्ययनम् (अयं शब्दः कक्ष्यापरिवेशे गुरुमुखादध्ययनम् निर्दिशति, गुच्छीकरणम्, गुच्छनम् (विविधरूपेण वर्गीकरणम्) |
| 26. Cognition | प्रमा, ज्ञानम् |
| 27.. Cognitive | प्रमा ज्ञानसम्बन्धी |
| 28.. Cognitive Domain | ज्ञानरङ्गम् |
| 29. Cognitive Engagement | बौद्धिकव्यापारमग्रता ज्ञानव्यापृतता वा |
| 30. Cognitive Learning | संज्ञानाधिगमः |
| 31. Cognitive Objectives | संज्ञानोद्देश्यानि |
| 32. Cognitive Strategy | संज्ञानव्यूहः |
| 33. Cognitive Structure | संज्ञानसंरचना |
| 34. Cognitive Time | प्रत्यक्षकालः, प्रतिक्रियाकालो वा |
| 34. Cognitivists | संज्ञानवादिनः |

**सन्दर्भग्रन्थसूची** –

1. Niruktam, Meherchand Lachhman Das Publications, New Delhi 1982
2. Systems of Sanskrit Grammar, S.K. Belvalkar, Bharatiya Vidya Prakasan, Delhi, 1998
3. अमरकोशः, सुधाव्याख्यासहितः, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2003
4. अमरकोशः, सुधाव्याख्यासहितः, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2003,
5. History of Sanskrit Lexicograhpy , MM Pathkar, Munshiram Manoharlal Pub, New Delhi 1981
6. A. Biswas, J. C .Aggarwal, Vol.I, The Academic publishers (India) New Delhi ,2004
7. (2Vols.) Ed.J. S. Rajput, N.C.E.R.T, New Delhi, 2004
8. A.S. Raghavakumari , Abhijit Prakashana, Mysore, 1996
9. Descriptive Dictionary of Learning Terminology, Term No.293
10. Little oxford dictionary, Oxford Publication